International Journal of Sanskrit Research 2024; 10(6): 67-69

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(6): 67-69
© 2024 IJSR
www.anantaajournal.com
Received: 13-08-2024
Accepted: 16-09-2024

**सुप्रिय प्रामाणिक:**
Assistant Teacher,
Kumarpur Primary School,
Beldanga, Murshidabad,
West Bengal, India

# महाभारते प्रतिफलितं सांख्ययोगम् अभिन्नम् एकं समीक्षणम्

**सुप्रिय प्रामाणिक:**

**DOI:** https://doi.org/10.22271/23947519.2024.v10.i6b.2516

**सारांश**

सांख्यदर्शनं योगदर्शनञ्च समानतन्त्रम् इति कथ्यते। समानतन्त्रस्य अर्थः येषां सिद्धान्तानि समरूपाणि। यद्यपि सांख्ययोगयो र्मध्ये ईश्वरविषये पार्थक्यमस्ति। सांख्ये ईश्वरः न स्वीकृतः योगे तु ईश्वरस्यास्तित्वं स्वीकृतम्। अतः महाभारते प्रतिफलितयोः सांख्ययोगयो र्मध्ये भेदमस्ति न वेति प्रसङ्गेऽस्मिन् प्रबन्धे चर्चा क्रियते। महाभारते सांख्यं योगञ्च वैदान्तिकशैल्यालोचितम्। स्थलविशेषेषु महाभारतकारेण कानिचन सिद्धान्तान्युत्थापितानि, तेभ्यः सिद्धान्तेभ्यः एवं प्रतीयते सांख्यं योगञ्च अवश्यमेव पृथकम्। टीकाटीप्पनीयोगआलोचनातः तु इदं ज्ञायते महाभारतकारेण सांख्ययोगयोः एकत्वं समर्थयति। महाभारतस्य सभापर्वणि यथा देवर्षिनारदस्य विशेषणम् अस्ति 'सांख्ययोगविभागज्ञो'। अस्य शब्दस्य अर्थः यः सांख्यस्य योगस्य च विभागविषये ज्ञानवान्। सांख्ययोगयोः एकत्वं चेत् महाभारतस्य काम्यं भवति तर्हि कथं तेन इदं उक्तम्? प्रसङ्गे अस्मिन् उच्यते अत्र 'विभागः' इत्यनेन शब्देन उपयोगः वोध्यते। मोक्षे सांख्स्य योगस्य च किम् उपयोगम् अस्ति यः जानाति सः एव सांख्ययोगविभागज्ञः। आत्मज्ञानप्राप्तये सांख्यः बहिरङ्गसाधनं योगश्च अन्तरङ्गसाधनम्। आत्मज्ञानलाभे न केवलं सांख्यज्ञानस्य योगस्यापि प्रयोजनमस्ति। "यदेव योगाः पश्यन्ति सांख्यैस्तदनुगम्यते। एकः सांख्यञ्च योगञ् यः पश्यति स बुद्धिमान्॥" (शान्तिपर्वणि 297/19) – इति महाभारतवाक्यतः अपि सांख्ययोगयोः ऐक्यं प्रदर्शितम्। पुनः श्रीमद्भगवद्गीतातः अपि ज्ञायते सांख्ययोगयोः भेदः नास्ति। अत उच्यते – " सांख्ययोगौ पृथग्वालाः प्रवदन्ति न पण्डिताः। एकमप्यास्थितः सम्यगुभयो विन्दतेफलम्॥ " (श्रीमद्भगवद्गीता 5/4)

**कूटशब्दाः** समानतन्त्रम्, ईश्वरः, 'सांख्ययोगविभागज्ञो', उपयोगः

**प्रस्तावना**

महाकाव्येषु महाभारतम् अन्यतमम् अस्ति। न केवलं साहित्ये अपितु दार्शिनकक्षेत्रेऽपि अस्य महाकाव्यस्य प्राधान्यमस्ति। अत्र बहवः दार्शनिकनिष्कर्षाः उल्लिखिताः सन्ति। तेषु दर्शनेषु केवलं सांख्यं योगञ्च आधारीकृत्य अत्र आलोचना भवति। समानं सिद्धान्तं प्रदर्शनात् इमौ दर्शनौ समानतन्त्रम् इत्यभिधीयते। तथापि दर्शनयोरुभयो र्मध्ये पार्थक्यमेकमस्ति। तत् पार्थक्यं तु ईश्वरबिषये वर्तते। अर्बाचीनं सांख्यं निरीश्वरसांख्यम् इत्यभिधीयते योगसम्प्रदायश्च सेश्वरसांख्यमिति। महाभारतेऽपि बहुषु स्हलेषु सांख्ययोगयो पर्थिक्यं नास्ति इति मतं स्वीकृतम्। सांख्यकारिकायोगदर्शनयोः सिद्धान्तम् अस्याः चर्चायाः मुख्यस्तम्भः नास्ति, यदि स्यात् तर्हि महाभारते उक्तयोः सांख्ययोगयोः एकरूपता बाधीतवती स्यात्। अतः कस्मात् दृष्ट्या सांख्ययोगयोः एकतायाः महाभारते चर्चा कृता, तदेव चर्चाविषयः।
वेदान्तदर्शने कथितं जगत् भवति असत्यम्। सांख्ये तु तज्जगतः सत्यता अस्ति। अस्मिन् जगति त्रिविधं दुःखमपि अस्ति। विवेकज्ञानेन दुःखत्रयात् अस्माकं परित्राणं भवति। ज्ञानेन अपवर्गः मुक्तिश्चापि सम्भवः।

ज्ञानेन चापवर्गो विपर्य्यायादिष्यते बन्धः॥[1]

महाभारते तु इदं तत्त्वज्ञानं भिन्नरूपेण प्रस्तुतम्। महाभारते उक्तं सांख्यदर्शने उल्लिखितेन तत्त्वज्ञानेन एव प्रारब्धकर्मान्ते सांख्यमतानुयायिनः परमगतिं प्राप्नुवन्ति। महाभारते परमगतिः इत्यनेन ब्रह्मस्वरूपज्ञानं मोक्षं वा निर्दिश्यते। सांख्यदर्शनस्य यत् तत्त्वज्ञानं तदेव ब्रह्मणः स्वरूपम्। अतः तत् परमगतिप्राप्तये सांख्यतत्त्वज्ञानात् श्रेष्ठं ज्ञानं नास्ति। एतद् ज्ञानं योगदर्शने उक्ताद् ज्ञानात् भिन्नम् एव।

सांख्या राजन्! महाप्राज्ञा गच्छन्ति परमां गतिम्।
ज्ञानेनानेन कौन्तेय! तुल्यं ज्ञानं न विद्यते॥

**Corresponding Author:**
**सुप्रिय प्रामाणिक:**
Assistant Teacher,
Kumarpur Primary School,
Beldanga, Murshidabad,
West Bengal, India

---

[1] सांख्यकारिका 44

अत्र ते संशयो मा भूज्ज्ञानं सांख्यं परं मतम्।
अक्षरं ध्रुवमेवोक्तं पूर्णं ब्रह्म सनातनम्॥[2]

पृथक्प्रस्थानद्वयस्य सिद्धान्तमपि भिन्नं भविष्यति इति तु स्वाभाविकम् अस्ति। महाभारते सांख्ययोगो एतौ प्रस्थानौ तु पृथक् पृथक् इति दृश्यते। यदा तु एतौ प्रस्थानौ समानतन्त्रम् इति कथ्यते तदा चिन्तनीयम् एतद् वक्तव्यम् अवश्यमेव तात्पर्यपूर्णम् अस्ति। महाभारतकारस्य तस्य तात्पर्यस्य महत्त्वं ज्ञातुं टीकाटीप्पन्यादि भाष्यस्य आवश्यकता वर्तते। महाभारतस्य सभापर्वणि प्रसङ्गक्रमेण देवर्षिनारदस्य विशेषणरूपेण ष्सांख्ययोगविभागज्ञोष् इति शब्दगुच्छं प्राप्नुमः।

प्रत्यक्षदर्शी लोकस्य तिर्यगूर्ध्वमधस्तथा।
सांख्ययोगविभागज्ञो निर्विवित्सु सुरासुरान्॥[3]

अर्थात् देवर्षिः नारदस्तु सांख्ययोगविभागविषये प्रकृष्टः ज्ञानवान्। विषयेऽस्मिन् महाभारतस्य प्रसिद्धयोः टीकाकारयोः श्रीमन्नीलकण्ठहरिदाससिद्धान्तवागीशयोश्च मध्ये मतपार्थक्यम् अस्ति। हरिदाससिद्धान्तवागीशः तुल्यकालिकप्राचीनकालस्य भाष्यकारः अस्ति। यस्मिन् काले सः भारतकौमुदी टीका रचितवान् तस्मिन् काले सांख्ययोगदर्शनञ्च आत्मवैभवेन प्रदीप्तम् आसीत्। अतः हरिदाससिद्धान्तवागीशः सांख्यं योगप्रस्थानं च पृथक् पृथक् पश्येत इति तु स्वाभाविकम्। सांख्यशास्त्रं महर्षिणा कपिलेन प्रणीतम् इति हरिदासस्य सिद्धान्तम्। सांख्यशास्त्रस्य प्रधानः प्रतिपाद्यविषयस्तु दुःखत्रयाणाम् आत्यन्तिकी निवृत्तिः पुरुषार्थसिद्धिश्च। योगदर्शनञ्च महर्षिणा पतञ्जलिना प्रणीतम्। अस्य ग्रन्थस्य मुख्यः प्रतिपाद्यविषयः योगस्य गुरुत्वप्रतिपादनम्। योगेनापि मुक्तिलाभः सम्भवः। पुनः सांख्ययोगञ्च ज्ञानविशेषम् इत्यपि कथ्यते। सांख्ययोगयोः विभागविषये देवर्षिनारदः सुविदितः अस्ति।

सांख्यं कापिलं शास्त्रं " अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः" इत्यादि, योगः पातञ्जलं शास्त्रम् " अथ योगानुशासनम् " इत्यादि, तयोर्विभागज्ञो वैषम्याभिज्ञः।[4]

महाभारतीयसांख्येन सह वेदान्तसिद्धान्तस्य सम्बन्धः अस्ति। भाष्यकारस्य नीलकण्ठस्य मते सांख्यस्यार्थः ' वेदान्तविचारः' योगस्यार्थश्च 'चित्तवृत्तेः निरोधः' इति। एतयोः विभागे वा उपयोगे वा देवर्षिनारदः सुविदितः आसीत्। अतः सः सांख्ययोगविभागज्ञः। टीकाकारः नीलकण्ठः सांख्ययोगयोः परस्परपरीपूरकभावः निर्वाहयितुम् व्याख्यायते –

सांख्ययोगविभागज्ञः सांख्यं वेदान्तविचारः योगश्चित्तवृत्तिनिरोधः अनयोर्विभाग उपयोगः।[5]

आत्मज्ञानलाभाय सोपानत्रयं भवति श्रवणं मननं निदिध्यासनञ्चेति। महाभारतीय सांख्यस्य उपयोगिता अस्ति श्रवणात्मकवाकार्थ्यविचारविषये। सांख्य तस्य तत्त्वज्ञानेन श्रवणात्मकविषयस्य यथार्थतत्त्वं निर्धारयति। न केवलं तत्त्वज्ञानेन आत्मज्ञानलाभः सम्भवः, तेषां कृते योगस्यापि उपयोगिता अस्ति। चित्तवृत्तेः निरोधः योगः - "योगश्चित्तवृत्तिनिरोधः"। पातञ्जलदर्शनम् समाधिपादः2। योगः विक्षिप्तं मनः शान्तयति। तदनन्तरं चित्तं निदिध्यासने समर्थः भवति। निदिध्यासनः आत्मज्ञानप्राप्तेः अन्तिमः चरणः अस्ति। अस्मिन् चरणे अनात्मसु विषयेषु आत्मभावदृष्टि निराकृता आत्मज्ञानञ्च प्राप्नोति।

निदिध्यासनापर पर्य्यायो योगः, अनात्मसु देहाद्विष्वात्मप्रत्ययरूपां विपरीतभावनां निवर्त्त्य ज्ञातृज्ञानज्ञेयाभाववन्तं दृङ्मात्रप्रत्ययं गोचरयतीति योगविभागः।[6]

मननस्य कार्य्यं युक्तितर्केन ब्रह्म एव केवलमात्रं ध्येयः इति निर्णयः –

तत्र श्रवणात्मको वाक्यार्थविचारः प्रमाणगता सम्भावनानिवृत्त्युपयोगी मननाख्यः श्रुतस्यार्थस्य तर्केणानुसन्धानरूपोविचारः प्रमेयगतासम्भावनाविवृत्त्युपयोगी अद्वैतमेव वेदो वदति युक्तियुक्तं चैतदेवेति सांख्यविभागः।[7]

गोज्ञानलाभार्थं यथा गोशब्दार्थस्य ज्ञानम् आवश्यकं तथैव गौरस्य चाक्षुषप्रत्यक्षमपि आवश्यकम्, अन्यथा गोज्ञानं सम्पूर्णं न भविष्यति। तथैव सांख्यज्ञानं योगज्ञानं च आत्मज्ञानप्राप्तौ परस्परं पूरकं भवति। अतः अनेन सिद्धान्तेन सांख्ययोगयोः पृथकत्वं कदापि वक्तुं न शक्यते। प्रसङ्गेऽस्मिन् उच्यते

यथा दृष्टगोपिण्डस्याप्यगृहीतशब्दार्थसङ्गतिकस्य इयं गोरिति वाक्यमेव गवाज्ञाननुन्नचक्षुस्तेन विषयीकृतेऽपि गोपिण्डे गोवुभुत्सानुवृत्तेः। एवं साक्षात् कृतत्वं पदार्थस्यापि तत्त्वमसीति वाक्यमेव संसावानर्थमूलब्रह्माज्ञानस्य निवर्त्तकं न मनस्तेन दृष्टेऽपि त्वमर्थे संसावानर्थब्रह्मा- ज्ञानानुवृत्तिदर्शनात्। एवं सास्नादिमती गौरिति लक्षणतो ज्ञातगोपदार्थस्यापि गोपिण्डदर्शनमेव गोवुभुत्सानिवर्त्तकं न तु वाक्यम्। तथा श्रवणादिना ज्ञातब्रह्मपदार्थस्यापि योगादेव दर्शनं न तु वाक्यात्।[8]

महाभारतस्य शान्तिपर्वणि अपि कथितं यत् मृत्युबन्धनविच्छेदे यथा सांख्यस्य तुल्यं ज्ञानं नास्ति तथा योगतुल्या शक्तिश्च नास्ति। अज्ञानिनः एवं सांख्यं योगं च पृथक् पृथक् इति जानन्ति।

नास्ति सांख्यसमं ज्ञानं नास्ति योगसमं वलम्।
तावुभावेकचर्यौ च उभावनिधनौ स्मृतौ॥
पृथक् पृथक् प्रपश्यन्ति येऽप्यबुद्धिरता नराः।
वयन्तु राजन्! पश्याम एकमेव तु निश्चयात्॥[9]

महाभारते जनशिक्षाप्रयोजनार्थं विवादास्पदविषयेषु यथा प्रश्नं पृष्टवान् तथैव सर्वेषां पक्षाणां सन्तुष्टिविधानाय निरपेक्षभावमपि गृहीतम्। महाभारतस्य शान्तिपर्वणि दृश्यते युधिष्ठिरः महामतिं भीष्मं पृष्टवान् सांख्ययोगयोः मध्ये किमपि भेदः अस्ति वा इति। यतो हि योगः ईश्वरविश्वासी सांख्यं च अनीश्वरवादी, तस्मात् कविः व्यासदेवः कुशलतया विवादं प्रस्तुत्य तस्य निराकरणमपि करोति।

अनीश्वरो कथं मुच्येदित्येवं शत्रुकर्षण!
वदन्ति कारणं श्रेष्ठं योगाः सम्यङ्मनीषिणः॥[10]

व्यासदेवः अत्र सपक्षसमर्थनेन कथयति यत् यद्यपि सांख्ययोगयोः भेदः नास्ति तथापि सांख्याः सांख्यं स्तुवन्ति योगिनः योगं प्रशंसन्ति।

सांख्याः सांख्यं प्रशंसन्ति योगा योगं द्विजातयः।
वदन्ति कारणं श्रेष्ठं स्वपक्षोद्भावनाय वै॥[11]

अपि च सांख्ययोगयो एकत्वं शान्तिपर्वणि अपि दृश्यते, सांख्यशास्त्रज्ञाः तस्यैव तत्त्वस्य अनुसरणं कुर्वन्ति यत् तु योगविद्वांसः योगवलेन पश्यन्ति।

यदेव योगाः पश्यन्ति सांखैस्तदनुगम्यते।
वदन्ति कारणं श्रेष्ठं स्वपक्षोद्भावनाय वै॥[12]

---

2 महाभारतम् 12/294/99

3 महाभारतम् 2/5/7

4 महाभारतम् 2/5/7, भारतकौमुदी

5 महाभारतम् 2/5/7, भारतभावदीपः

6 महाभारतम् 2/5/7, भारतभावदीपः

7 तत्र

8 तत्र

9 महाभारतम् 12/306/2,3

10 महाभारतम् 12/293/3

11 महाभारतम् 12/293/2

टीकाकारः हरिदाससिद्धान्तवागीशः अपि सिद्धान्तम् इदं समर्थनं करोति – यत् तत्त्वम्। एकमभिन्नमतम्।[13]

यद्यपि प्रयोगे किञ्चित् भेदाः सन्ति तथापि तेषां एकत्वं फलसाधने दृश्यते अतः ते पृथक् न मन्तव्याः।

फलतः साधनतश्च सांख्ययोगयोरैके सति व्यवहारोपपादने निस्तात्पर्य्ये तयोर्व्विवोधे दृश्यमानोऽप्यकिञ्चित्कर इति भावः।[14]

अतः श्रीमद्भगवद्गीतायां पञ्चमे अध्याये उच्यते सांख्योक्ततत्त्वज्ञानेन या मुक्तिः योगेनापि सम्भवतीति।

यत् सांख्यैः प्राप्यते स्थानं तद्-योगैरपि गम्यते।
एकं सांख्यञ्च योगञ्च यः पश्यति सः पश्यति॥[15]

अत्र सांख्यस्य अर्थः कर्मसन्यासः योगस्य अर्थः कर्मयोगः । सांख्ये निष्कामकर्ममाध्यमेन मुक्तिमार्गं निर्दिष्टम् । वस्तुतः कर्मणा सन्यासग्रहणान्तरं तत्त्वज्ञानेन मुक्तिः कर्मसन्यासः इति कथ्यते । पुनः कानिचन कर्माणि यानि जीवनधारणाय उपयोगिनः तानि तु ईश्वराय अर्पितव्यानि येन आसक्तिः न जायते, एतत् कर्मयोगं कथ्यते । एतयोः सांख्ययोगयोः परिणामः समानः इति कारणतः पण्डिताः अपि तान् पृथक् न वदन्ति। यदि एतयोः अनुष्ठानयोः एकं सम्यक् क्रियते तर्हि उभयम् अपि लब्धुं शक्यते।

सांख्ययोगौ पृथग्वालाः प्रवदन्ति न पण्डिताः।
एकमप्यास्थितः सम्यगुभयोविन्दते फलम्॥[16]

महाभारते सामान्यतया सांख्ययोगयोः केचन पद्धतिगतभेदाः सन्ति चेदपि महाभारतकारेण तेषां भेदाः अपक्षया एकत्वविषये अधिकं गुरुत्वं प्रदत्तम्। युगपत् सांख्ययोगोच्चारणं तस्य निदर्शनम्। पुनः शौणकमुनेः विद्यावत्ताप्रसङ्गे उच्यते सः वेदान्तशास्त्राध्यात्मरतो सांख्ययोगपारब्धश्च । अत्र सांख्ययोगयो एकत्र कथनं तेषां एकतायाः सूचकः अस्ति।

तमध्यात्मरतो विद्वान् शौणको नाम वै द्विजः।
योगे सांख्ये च कुशलो राजानमिदमब्रवीत्॥[17]

पुनः सांख्ययोगयोः एकत्वप्रतिपादनाय उच्यते भगवान् महादेवः एव सांख्यस्य योगस्य प्रणेता। सः एव सांख्यप्रणेतारूपेण महर्षिः कपिलः योगप्रणेतारूपेण च महर्षि पतञ्जलिः। अतः सः एव सर्वैः प्रणम्यः – "नमः सांख्याय योगिने।" अयं महादेवः सर्वभूतानां आत्मा, स एव सांख्यकथितः पुरुषः योगकथितः श्रेष्ठपुरुषश्च।

आत्मा च सर्वभूतानां सांख्ये पुरुष उच्यसे।
ऋषभस्त्वं पवित्राणां योगिनां निष्कलः शिवः॥ महाभारतम् 13/13/316

ये इमं महादेवं पूजयन्ति भक्त्या च स्त्रोणापि पठन्ति ते सांख्यज्ञानीयोगसिद्धान्तपुरुषः यथा फलं प्राप्नुवन्ति तथैव फलं प्राप्स्यन्ति।

एवमेतत् पठन्ते य एक भक्त्या तु शाङ्करम्।
या गतिःसांख्ययोगानां व्रजन्त्येतां गतिं तदा॥ महाभारतम् 13/16/171

उपर्युक्तविमर्शेषु सांख्योयोगयोः एकतायाःविषये एकः सुप्तः संकेतः अस्ति यः विश्लेषणसापेक्ष्यः अस्ति। यथा सांख्ययोगयोः प्रणेता महादेवः एव न तु भिन्नः, पुनः सः महादेवः सांख्यस्य पुरुषः योगस्य श्रेष्ठः योगी । अपि च सांख्ययोगस्यापि परिणामः एक एव इति उच्यते।

**समीक्षणम्**

अतः आलोचनान्ते वक्तुं शक्नुमः यत् यद्यपि सांख्ययोगयोः केचन पद्धतिगतभेदाः सन्ति तथापि आत्मतत्त्वलाभरूपं समानं विषयं प्रमूखता प्रदानेन महाभरते सांख्ययोगयोः समानत्वं कथ्यते इति तथ्यं तु अत्यन्तं महत्त्वपूर्णं समीचीनं च । सामान्यजनाः सांख्ययोगयोः मध्ये भेदा पश्यन्ति, सिद्धपुरुषाः पण्डिताश्च सांख्ययोगं समानं पश्यन्ति। इति शम्।

**सहायकग्रन्थाः**


1. सांख्यदर्शनम्- बङ्गीय आर्य प्रतिनिधी सभा - कलिकाता-2018
2. सांख्यकारिका- पश्चिमबङ्ग राज्य पुस्तक पर्षत्- कलिकाता-2007 सि
3. पातञ्जलदर्शनम्- पश्चिमबङ्ग राज्य पुस्तक पर्षत्- कलिकाता-2005 वि
4. महाभारतम्- विश्ववाणी- कलिकाता- 1938


[12] महाभारतम् 12/297/19

[13] महाभारतम् 12/297/19, भारतकौमुदी

[14] महाभारतम् 12/297/19, भारतभावदीपः।

[15] श्रीमद्भगवद्गीता 5/5

[16] श्रीमद्भगवद्गीता 5/4

[17] महाभारतम् 3/2/14